५२८ - घ

काव्यविलासः

चिरंजीवमहाचार्यः

२२ लेखकालः १८२४

काव्यम् अलंकार -
- निर्णयः

का॰ श्रीगणेशाय नमः नमो गुणविनाशिनी सकलकालमुद्योतिनी धरातलविहारिणी

वि॰ जडसमाजविद्वेषिणी कलानिधिसहायनी लसदलोलसौदामिनी मदनरखवल्लविनी

१ भवतु कापि कादंबिनी १ कृतिभिः कृतिभिर्विलसन्मतिभिः कतिवा न कृताः कृतयः

कविभिः इति मत्कविताभिरुचिः शिथिलीभविता जगतामिति चेत् कथयेत् २ कथय

तु नाम तावत् नानाकुतोऽपि तु तः यतः मणिकलितनीलिमकमपि काचबोधा

न्मुञ्चत्यञ्जनियद्विपामराः कथय कैव हानिर्मदा यतो जगति कश्चन स्फुरितमुज्ज्वला

जगत्परीक्षणविचक्षणाः क्षणमपीक्षणं धास्यन्ति २ अलंकाररसानेकवृत्त्यादिषु गुणे

षु च लक्ष्यन्ते स्वीयपद्यानि प्राचीनकृतलक्षणैः ३ तत्रादौ काव्यस्वरूपं निरूप्यते तथा च

काव्यप्रकाशे तददोषौ शब्दार्थौ सगुणावनलंकृती पुनः क्वापि अस्यार्थः शब्दार्थौ

तत्काव्यं अत्रोद्देश्यविधेयभावेन विभिन्नभक्तिकृतो दोषः बहवः प्रमाणमिति वदन्ति की

दृशौ अदोषौ दोषरहितौ दोषाश्च प्राक्कृतसंस्कृतप्रभृतयः सगुणौ गुणसहितौ गुणाश्च

ओजःप्रभृतयः क्वापि पुनः क्वचित् पुनः अनलंकृती अपि स्फुटालंकाररहितावपि शब्दा

र्थौ काव्यं भवत एव इति तु ये स्फुटालंकारवदेव काव्यमामनन्ति तन्मतमपाकर्तुमुक्तं [illegible]

गमप्रभृतिषु सरसालंकारवती निर्दोषा गुणभूषिता सरीति लक्षणवती या वाक् सा नाम काव्य
भाक् रसग्रहणेन रसानुगुणाभावादयोपि गृहीताः एतन्मते रसगुणरीति लक्षणानां स
त्वमावश्यकं दोषरहितं तु दोषवंधादि विजृंभितेनेति काव्यप्रयोगवद्रसादिवद्विष्यपी
ताप्रायः अतिनवीनास्तु विलक्षणचमत्कारकारिणि काव्ये ऽदुष्टे काव्यमिति प्रयोगः नत
नैतत्काव्यमिति प्रयोगः सत्यपि च रसादौ विना विलक्षणचमत्कारमभिज्ञानां काव्यमिति नप्र
तीतिरिति साधु वदंति काव्यप्रयोजनमाह रायीः काव्यं यशसेर्थकृते व्यवहारविदे शिवेतर
क्षतये सद्यः परनिर्वृतये कांतासम्मिततयोपदेशयुजे कालिदासादीनामिव यशः धावका
दीनामिव धनं भाष्यादीनामिव व्यवहारज्ञानं मयूरादीनामिव शिवेतरस्याशिवस्य क्षतिः का
व्यकारणमप्याह शक्तिः प्रतिभैव शक्ता नाभ्याससहिता कविताकरी अनाभ्यासाभ्यां सहिता प्रतिभे
व कवितां करोति प्रतिभा संस्कारविशेषः अतः काव्यज्ञेभ्यः श्रवणमभ्यासः पुनः पुनः परिशील
नं तदाऽऽहुरन्येपि तां विना काव्यं न प्रसरेत प्रसारितमप्युपहासाय स्यादिति अथ पूर्वकाव्यस्वरू
पस्य घटकतयोक्तान्रसादीन्निरूपयति अत्र रसानाह यथा शृंगारहास्यकरुणरौद्रवीरभयान
काः रसा नव समुद्दिष्टा वीभत्साद्भुतशांतयः अमीषां रसानामनुगुणतया विभावादयोपि निरू
प्यंते आलंबनोद्दीपनात्मा विभावः कारणं द्विधा कार्यानुभावस्तेषां सहायो व्यभिचार्य्यतः

विशेषेणाभावयन्तुत्पादयन्ति रसानिति व्युत्पत्त्या सिद्धो विभावः कारणरूपः स च द्विविधः
आलंबनोद्दीपनात्मा आलंबनस्वरूपः उद्दीपनस्वरूपश्च यदालंब्य रसो भवति तदालंबनं
शृंगारे कांतादि यद्रसमुद्दीपयन्ति तदुद्दीपनं यथा शृंगारे चन्द्रचंदनवनिताद्यानादि अनु
पश्चाद्भाव उत्पत्तिर्यस्येति व्युत्पत्त्यानुभावः कार्यरूपः यथा शृंगारे कटाक्षादिः कदाचिदितर
रससाधारणोपि भवति अतो व्यभिचारी रसानां सहायः सहकारी यथा शृंगारे उन्मादादिः तास्था
यीनां तु विभावादयस्तत्तद्विरूपेण कालेव क्रमात् रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा जु
गुप्सा विस्मयश्चेति निर्वेदः स्थायिभावकाः अमी शृंगारादिषु क्रमेणैव स्थायिभावा भवंतीत्यर्थः
अत एव स्थायिभावाः पूर्णश्च रसरूपेण परिणमंति यथा लवणोदयः कुंडलादिरूपेनेति यथा
शृंगारादीनां क्रमेणैव लक्षणोदाहरणानि रत्याख्यः स्थायिभावान्मालवहलभादिविभावजः कटा
क्षाद्यनुभावश्चोन्मादादिव्यभिचारिभाक् संभोगो विप्रलंभश्च शृंगारो द्विविधो रसः यत्र रतिः स्था
यिभावः कांतादिर्विभावः कटाक्षादिरनुभावः उन्मादादिर्व्यभिचारीभावः स रसः शृंगारः स च
द्विविधः संभोगो विप्रलंभश्च संभोगस्तु कांतयोः परस्परालोकनस्पर्शनचुंबनादिभिरनेकवि २
धः कांताकृतसंभोगो यथा सुरसुंदरबालिंताङ्गुलीवदनाच्छादनचालेन नसा शायितादयि
तानन्तं मुद्रामुऊरुन्मीलितलोचनेति ते कांतकृतः शृंगाररतद्विंसां यथा आलोकयाननस्तुधा

करपानकाले बाले विलोचनविलोलचकोरचंचोः मुक्ताः छलेन नियतं नवनासिकांतः पीयूषबिंदुर
भिनोगलितो विभाति विप्रलंभस्तु द्विविधः भाविवियोगसंभावनातो वियोगाच्च आद्यो यथा यामी
मुतो कथमपि सकृत् आलनाथ निष्पीय वालामृतानास्तुगिव कलिताभानुभिभानवीयैः आननास्य
करकिशलयन्यस्तं ताम्बूलगुच्छं चित्रारूढाकृतिरिव परं भित्तिमालंव्य तस्थौ द्वितीयो यथा तत्रैव आली
चालितपद्मिनीदलचलन्तं वीणामंगीकृतं स्वागालिंगनमर्मीकृतं नवं भाजालिशय्या विरात् वेतन
न्यकथमपुपेत्य नैकहन्मीलयनेत्राचलं वालाकेवलमेव शून्यहृदया शून्यं जगत्पश्यति इति शृंगाररसः
लास्य स्थायी रसो हास्यो विभावाद्यैर्यथाक्रमं वैरूप्यफुल्लगंडत्वावहित्थाद्यैः समन्वितः यस्य हासः स्थायी
भावः विभावो वैरूप्यं फुल्लकपोलादिरनुभावः अवहित्थादिर्व्यभिचारीभावः अवहित्थमाकारविगोपन (?)
संगोपनं स रसो हास्यः यथा द्विगंबरो वदुजटा किरीटो भस्मांगरागः फणिभूषणाढ्यः जराः स्खलन्
गवेवाहने न समागतो गौरि वरस्त्वदायं इति हास्यरसः अभीष्टविप्रयोगाश्रुपातनग्लान्यादिभिः क्रमात्
विभावाद्यैर्युतः शोकं स्थायी स्यात्करुणो रसः यस्य शोकः स्थायीभावः अभीष्टस्य पुत्रादेर्विप्रयोगो विभा
वः विप्रयोगस्तु द्विविधः दूरगमनादिरूपो मरणरूपश्च अश्रुपातादिरनुभावः ग्लान्यादिर्व्यभिचारीभावः
स रसः करुणः यथा अपि जीवितनया न नेपरो भवतः कोपि मयानवीस्ततेयमुपेत्य सम्भवां स्थितो दिवंगत
एकाकितया निजस्वरं यथा विप्रलंभः करुणेनांतर्भवति तदेयवस्याम इति करुणो रसः रौद्रो क्रोधः स्थायी
रसो रौद्रो विभावाद्यैः समन्वितः मात्सर्यादहस्तनिष्पेषस्वेदाद्यैर्यथाक्रमं यस्य क्रोधः स्थायीभावः मात्सर्या

का॰ द्दिर्विभावः हस्तनिष्पेषवाक्याडंबरादिरनुभावः संमोहादिर्व्यभिचारीभावः स रसो रौद्रः यथा
वि॰ संभाडम्नस्त्यगर्जुत्भ्रुकुटितटललनाभिवणः सहरोन प्रोद्यद्दैत्येंद्रवक्षःखरनखरैर्जर्जरभि
३ न्नः संविदार्य उत्कृत्योत्कृत्य मांसं प्रकटमभिनटन्नुत्कटोत्कुत्कवाटं दंष्ट्रासंदष्टमाद्यो
३ न्नृहरिरवतु वः कष्टनःस्पष्टमिष्टः रौद्रो रसः उत्साहाख्यः स्थायिभावः प्रभावादि
विभावभूः धैर्यानुभावो वीरः स्यात् रुवादिर्व्यभिचारिभाक् यस्योत्साहः स्थायीभावः
प्रभावादिर्विभावः धैर्यादिरनुभावः गर्वादिर्व्यभिचारीभावः स रसो वीरः ५ स वीरस्त्रिवि
धः युद्धवीरो दानवीरो दयावीरश्चेति तत्राद्यो यथा मंदाधकरिचीत्कृति स्फुरितसंगर
प्रांगणे धनुर्धरधुरंधरैर्यदपि गर्जितं गर्जितं तथापि यदपावितं न भूदयितस्य किं
चित्स्मितं स्मितं स्मितमुदीरयन्नुत्तरन्नुसमरवीरस्तु द्वितीयो यथा गौडस्वीयप्रावंतसिंहरुप
तेः य स्याद्यदानात्सवे चद्वयाचिनिसप्रतिप्रतिदिसांटे हीतिवाक्यैकगतिः देयं देयमिती
तिन्मुरसनाचानंदसिंधौ मनो धावद्याचकवृंदपाणिसंपुपरंपाणिः परिक्रीडति तृतीयो
यथा उदंचत्कल्लोले क्षिरदरापतितमुद्दिश्य विनयी उरःस्त्रीयामेवप्रपद्यतितनुं निष्कृ २
मविधेः प्रधावत्कल्लोलेर्भयतरलमावास्तितमिह प्रपंनुमैनाकं उनरयमधोयाति जलधिः
दयायाकरुणाच्यवहारस्तु गोरणएव ननु दयाकरुणोपपनभवत्ति दयोत्साहः स्थायी

भावः करुणस्यानुयोगकइतिभेदात् इति वीररसः ५ व्याघ्रादिर्विभावैस्तु कंपाद्यैरनुभाव
कैः मोहादिर्व्यभिचारीच भये स्थायी भयानकः यस्य भयं स्थायीभावः व्याघ्रादिर्विभावः कंपा
दिरनुभावः संमोहादिर्व्यभिचारीभावः स रसो भयानकः यथा नतैव नृपश्यन्ति तरंगितलोल
च गिरिं न खातोनोदरं न भालयन्ति वा क्वचिन्मृगपतिं पुरतोदयं गजमेनसि भावयन्ति गज
विपत्तेचेष्टामहो पलायनपरः करी विकलधीः परं धावति इति भयानको रसः ६ स्थायी जु
गुप्सा बीभत्सो विभावाद्यायथाक्रमं अनिष्टेक्षणनिष्ठीवसंमोहाद्याः प्रकीर्तिताः यस्य जु
गुप्सा स्थायी भावः अनिष्टस्य कदर्यस्य वस्तुनः ईक्षणं दर्शनं तदेव विभावः निष्ठीवनादिरनु
भावः संमोहादिर्व्यभिचारीभावः स रसो बीभत्सः यथा इयं व्याधदाराविकाराभिपत्नाम्लगा
त्रा लिप्तान्तरीसककालमाला अतिव्यात्तवक्त्रा दिग्धितिप्तनेत्रा समुत्कृत्यमांसं पिशाचीव भुंक्ते इति
बीभत्सो रसः ७ अद्भुतो विस्मयं स्थायी मायादिक विभावभूः रोमांचाद्यनुभावो यत्स्तंभादि
र्व्यभिचारि भाक् यस्य चित्तस्मयः स्थायीभावः नटकृतमायादिर्विभावः रोमांचादिरनुभावः
स्तंभादिर्व्यभिचारीभावः स रसोद्भुतः यथा आकाशे तु प्रसरजो रचयति दिवसे तारकाल्लिंति
मगयां भूसेः हृष्टे विवस्वज्जहिन किरणयोः कोटिबिंबं तनोति हलन्पलारबिंदे रचयति क
मलानन्तं नवर्णमानं स्वच्छेशुद्धिपानाशनमपि धामाधिकोयं किमेतत्नस्पद्भुतो रसः ८

का॰ निर्वेदः स्थायिकः शांतः सत्संगादिर्विभावकः क्षमाद्यनुभावोयं स्तंभादिर्व्यभिचारकः यस्य नि
वि॰ र्वेदः स्थायी भावः निर्वेदस्त्वात्मनोवमाननं संसारे हेयत्वबुद्धिर्वा सत्संगादिर्विभावः क्षमाद्यनु
४ भावः स्तंभादिर्व्यभिचारीभावः स रसः शांतः शिवलोके समालभ्य प्रीतिरमरतटिनीतीरपाकेले
5 दिनांते शकाशी क्वचिदपि च काशीपतिसरे निमेषार्द्धं गंगाधरस्मरणसंगात्रिजमनः कदाऽहं देवपू
तं नियतमभिभूतं कुमतिभिः इति शांतरसः ६ अथैषां रसानां रूपाणि दैवतानि च कथ्यंते रसा
ल श्यामस्फटिकपारावतविचित्रिताः आरक्तगौरमलिननीलगौरमिताः क्रमात् विष्णुर्मारुतब
हुरोरुद्रः प्राक्कालदन्तुहूतानाख्यः महाकालो विधाता ब्रह्मेति दैवतं रसानां अथ केचिच्छांतरसमा
यापि दशमो रसः मिथ्याज्ञानमत्र स्थायीभावः सांसारिकभोगाधर्माधर्मादिर्विभावः पुत्रकलत्र
राज्यादिरनुभावः मनोरथादिर्व्यभिचारीभावः इति वदंति उदाहरंति वाटीलाटीहयंभोरुह
रंभस्तकरीवापिकाकापिकांता तल्पं चंद्रातुकल्पं प्रकटयति मिथः कामिनीकामजातं रूपंका
मात्र रूपमणिमयभवनं बंधुरं बंधुरांगालोकेलोके शोकसत्वमसिन भुवने सर्वदा सर्वदाता इत्यादौ
पद्ये चेदं प्राचीनं अत्रेदं चिंत्यं मायाया अजादित्वेनाजन्यत्वाद्रसत्वासंभवः रसास्तु सर्वे जन्या एव कथ्यंते ४
कथ्यते मिथ्याज्ञानादिर्मायायाः कारणमिति शास्त्रविरुद्धत्वान्न वस्तुतत्त्वालंकारिणां मते रसोनि
त्यमानंदरूपः अतस्तस्य ब्रह्मस्वरूपत्वेन मायाया रसत्वासंभवः माया हि तुच्छा विनाशशालिनी ब्रह्म

भिन्नैवेति दिक् अत एव प्राचीनैस्तत्र प्रत्याय्यिकैरपि नैवेवरसाः कथिताः ननु विप्रलंभशृंगारः करुण एवांत
र्भवतु रुदितविलापादेस्तत्रापि सत्त्वादिति चेन्न करुणे शोकः कारणं विप्रलंभे शोकरूपकारणस्याभावा
त् ननु विष्टविश्लेषजनितमनोविकारविकारविशेष एव अपि तु इष्टविश्लेषजनितारत्यानालिंगितोम
नोविकारविशेष एव शोकः स च विप्रलंभेप्यस्त्येवेति चेन्न नहि शोकः केवलमिष्टविश्लेषजनितमनोवि
कारः तथा च विप्रलंभजनकमनोविकारस्य रत्यालिंगितत्वेन शोकत्वाभावः विशिष्टकांतादौ रतिर
वमनोविकारो स्यात् ननु तर्हि मृतेपि कांतयोरन्यतरस्मिन् शोको न स्यात् अत एव न स्याच्च करुणो रसः
स्याच्च विप्रलंभ एव तत्र रतिसत्त्वादिति चेन्न मृते तु कांतयोरन्यतरस्मिन् मृते तु न मिलनस्यासंभावि
तत्वेन तत्रानादिष्टसमीहायाएवासंभवः अत एव रत्यभावान्न विप्रलंभः किंतु करुण एव यदि तु तन्मि
लनसंभावनापि भवति तदा भवत्येव विप्रलंभः नन्वेवं सति तु तत्रादावपि विदिते शृंगारे करुणरसेन स्या
त् तत्रापि तत्रादिरूपं यद्दिष्टं तत्समीहाजनितमनोविकारसत्त्वात् स्याच्च विप्रलंभो रसः इति चेन्न इह
हि रतिर्न दृष्टमात्रसमीहाजनितमनोविकारः किंतु कांतकांतान्यतरसमीहाजन्यमनोविकार एव इति
न दोषः पले मेगापीति बोध्यं रतिर्देवादिविषयाभावात् तत्रापि परिग्रहः देवविषयायथा शिवस्तोत्रे न
सा सुक्तिः साधी त्रिपुरहरमाधीकृत भणानयस्यां त्वद्भक्तिः प्रभवति न वक्ति न वदभिधा अयं योगोसिंवधाम
मसंभवंबंधोपि त भगः त्वरणं प्रीत्याचेतः कलयति न वेनः पदयुगं नृपविषयायथा यदप्येतांस्ममीम
पिजयति भूमीपति शतं धनानां मानानाम विरतमिता दानरसिकं तथाप्येनं त्यक्तुं कथमपि न बोधा

का॰ वि॰ ५ 5

समुदयत्यभिज्ञं बिस्तानां नृपतिय शवं नेत्रणमपि पुत्रविषयायथा उदंचत्कल्लोलैर्निज
तनुजवात्सल्यवेगः करोति प्रारंभं स्तुरस्तुरमुपेतुं जलनिधिः अधोचत्कल्लोलैरयरयमहरु
धीरस्त्वपल्लतापरीवादाभीतः कथमपि पराङ्मुखमयते गुरुविषयायथा इमौ भट्टाचार्यप्र
वररघुदेवस्य चरणौ पारण्यौ चिन्तानन्निरवधिविधायस्थितवतः किमन्ये वाग्देवीप्रस्तुरवमु
खभाजां त्वभजनेरपि स्फूर्तिर्वाचामम्लानलहरीनिर्झरस्तेषां रसानामाधिक्यं विशेषं ग्रथ
यन्तो विवेचयिष्यामः हेतोः हेनमतादि निर्णयविधिः प्राज्ञैरुह्यः अतो भट्टाचार्यश्री
तावधानः इति योगोडोऽत्र बोध्यः कविः ग्रपेकाव्यविलाससन्ततिनि चिरंजीवनतनुजन्मना स
वोद्यारसभंगिरेवकवितारभायसभाविता इति श्रीभट्टाचार्यकृतकाव्यविलासे रसमयीभंगी
प्रथमः १ अथालंकारानिरूप्यन्ते तेचार्थालंकारशब्दालंकारभेदेन द्विविधाः अर्थस्यानेकावि
रूपाणि विनातैः स्याद्धि रूपता अलंकारत्वंचरसादिभिन्नव्यङ्ग्यभिन्नत्वे सति शाब्दार्थो व्यन्तर
निष्ठायाविषयितासंबंधावच्छिन्नाचमत्कृतिजनकतावच्छेदकतातद्वत्त्वं अनुप्रासा
दिविशिष्टशब्दज्ञानाद् उपमादिविशिष्टार्थज्ञानाद्ध चेमत्कारोदयान्तभुलक्षणसमन्वयः ५
एवकार्थयोर्ज्ञाननिष्ठचमत्कृतिजनकतायाविषयितयावच्छेदकत्वेन नातिव्याप्तिर्भूतानुप्रा
सोपमादेः लक्षिष्टावच्छेदकतावच्छेदकत्वात् रसवदाद्यलंकारसंग्रहाय व्यंग्यापर्यादिवारणाय
च भेदद्वयगर्भसत्यंतोपादानं अलंकाराइति व्याख्यातं तस्मान्तेयाधिनाम्निव १ अस्यार्थः तेरुपमा

द्भिः काव्यरूपाणि भूष्यन्ते तैर्विना काव्यस्वरूपेषु विरूपिता स्यात् तस्मात्तेऽलंकारा इति ख्याताः
येऽपि तानमलंकारानिव तथाहि उपमानन्वयश्चैव प्रतीपं ललितोपमा रूपकं परिणामश्चोल्लेख
तापह्नुती ततः छेकापह्नुतिः पर्यस्तापह्नुती कैतवेन सा उत्प्रेक्षा च स्मृतिर्भ्रान्तिः सन्देहो मीलितं तत
था उन्मीलितानुमाने व्याप्तिः परिकरस्तथा तदङ्कुरः काव्यलिङ्गं प्रहर्षणविषादने सामान्यात्ति
शयोक्तिश्च प्रौढोक्तिस्तुल्ययोगिता अप्रसंभावनं ज्ञेयं दीपकावृत्तिदीपके प्रतिवस्तूपमा चैव दृष्टान्त
श्च निदर्शना व्यतिरेकः सहोक्तिश्च विनोक्तिस्तदनन्तरं समासोक्तिरथ श्लेषः प्रशंसाऽप्रस्तुतस्य च
स्यात्सामान्यविशेषश्च न्यासोऽप्यर्थान्तरस्य च पर्यायोक्तिः स्तुतिर्निन्दा निन्दास्तुतिरतः परं आक्षेपश्च
विरोधश्च विरोधाभास एव च असंभवो विशेषोक्तिर्विभावश्चनसंगतिः विषमं च समं चैव विचित्र
मधिकं तथा अन्योन्यं च विशेषश्च व्याघातो गुम्फ एव च एकावली तथा मालादीपकं सार एव च यथा
संख्यं च पर्यायः परिवृत्तिरतः परं परिसंख्या विकल्पश्च समाधिश्च समुच्चयः प्रत्यनीकः प्रतीपश्च उ
ल्लासः पूर्वरूपता तद्गुणातद्गुणौ तद्वदवज्ञानुगुणौ तथा उत्तरं पिहितं चैव व्याजोक्तिस्तदनन्तरं व
क्रोक्तिश्च स्वभावोक्तिर्भाविकं भाविकच्छविः उदात्तश्चात्युक्तिरित्यलंकाराः प्रकीर्तिताः चित्रानुप्रास
यमकानानाभेदविलक्षणाः पुनरुक्तिप्रतीकाशाः शाब्देऽन्ये ते प्रकीर्तिताः अथैषामलंकाराणां क्रमेण
लक्षणोदाहरणानि उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः हंसीव कृष्ण ते कीर्तिः स्वर्गगामवगाहते
अस्यार्थः यत्र द्वयोरुपमानोपमेययोः सादृश्यलक्ष्मीरुल्लसति प्रकटमेव भासते तत्रोपमालंकारः यदीयं सा

का॰ वि॰ ६ दृश्यमन्यत्र वर्ण्यते तदुपमानं यस्मिन्सादृश्यमन्यस्य वर्ण्यते तदुपमेयं सादृश्यं तु तद्भिन्नत्वे
सति तद्गतभूयोधर्मवत्त्वं तद्गतयावन्तो धर्मेण सादृश्यप्रतीतिः स्यात्स भूयोधर्मः सादृश्य
व्यंजकाश्च इवादिशब्दाः यत्रामी सर्वेपि सन्ति तत्र पूर्णोपमा यत्र चैषामेकतरेण नास्ति तत्र
6 लुप्तोपमा पूर्णोपमा यथा उदितानंदसंदोहा स्मितस्मितारुणलोचना इयं गायति तन्
न्वंगी कोकिलेव कलस्वरं अत्रोपमानं कोकिला उपमेया तन्वंगी सादृश्यं कलस्वरगा
यनं व्यंजक इवशब्दः इति भवेयं पूर्णोपमा चंद्रमुखीत्यादौ लुप्तोपमा तासामुदाहरणा
ग्रंथबाहुल्यभिया विशेषेण न दर्शयेत उपमानादभिन्नस्योपमेयत्वेनान्वयः इदु विदुरि
वश्रीमानित्यादौ तद्वदनन्वयः उपमानादुपमेये भिन्नत्वे नान्वयः यथा नत्वेव समं नत्वयि
नेकलौ वर्णयन्ति वलेरपि मन्मते तव गुणैस्तैस्तैर्भवानिव भवानिह अत्र भवत्पदस्य बोध्यसौव
रान्तउपमानत्वं उपमेयत्वं चेति भवत्यनन्वयालंकारः २ उपमानोपमेयत्वे साम्यप्रतीपोपमा
मता उपमाने उपमेयत्वे सति उपमानत्वेन प्रसिद्धस्योपमेयत्वेन कल्पने कृते सति प्रतीपोपमालं
कारः यथा तदास्यसदृशं हंहृष्टं सरसीषु सरोरुहं किं च तन्मुखलिने खेलत्खंजनानयनेनोपमा प्रसिद्ध
उपमानं सरोरुहं उपमेयं मुखं इह तु तद्विपरीतं मुखसादृश्यत्वेन सरोरुहस्यात्र तथा एवं खंजन ६
नयनयोरपि इतीह भवति प्रतीपोपमालंकारः उपमानेन तु लीलादिपराक्षे ललितोपमा उपमा
नेलीलादिपदयोगे ललितोपमालंकारः लीलादीत्यादिना सदृशविलासादिपरिग्रहः यथा श्री

लीनोपुरतः कूलतरुलवङ्गमग्नकाएणिनवकंदूमिषात्कृटगुल्मादरचालितस्य सहसा चेलांचलस्यांतरे पतन्
स्याः तरुणमीतरुणामीतरुणद्वयमिदं हन्त वीतिन्तु सर्वतः खेलन्मंजुलखंजरीटयुगलस्पर्धिस्फुटं
वीक्षितं अत्रोपमेयतरुणद्वयोपमानेन खंजरीटयुगलेस्पर्धीति पदयोगेन भवति लक्षितोपमा रूप
कस्यादृष्टेपवाधे उपमानोपमेययोः उपमानोपमेययोरैक्यबाधे अभेदरूपे रूपकालंकारः स्यात् यथा
प्रतापोद्दीप्तदावानलवक्त्रलदग्धारिकाननः सत्सुकंठदूमाज्ञनितनगगनप्रांगणभुवि स्फुलिंगा
भाभासापरितनइतिसंभावणपरालवारीणांदारालहृदयेनऽपकारागुरुगताः अत्र प्रतापए
वोद्दीप्तदावानल इति समासवशादुपमेयस्य प्रतापस्य उपमानस्य उद्दीप्तदावानलस्याभेदः प्रती
यते इति भवति रूपकालंकारः एवमन्यत्रापि ५ परिणामो भवेद्रूप्याद्रूपकेऽयवधानगे यत्रा
भेद आरोप्यते न रूप्यं बसाभेदमारोप्यते तद्रूपकं तस्मात्तस्मिन्नव्यवधानगे सति परिणामालंकारः
यथा गमनोद्यमभाजि जीवितेशे वनितानां नवमदाननेत्रस्थितानां अरुणांबुजपेशाभिलाववनानेजं
लधारैवबभूवुर्दन्तमीः अत्र रूपरूपकयोर्जलधारा उद्दिनुश्रियोर्वभूवत्पनेन व्यवहित्वात्परि
णामालंकारः अत्र केचित्परिणामस्य लक्षणं तस्मादूष्यति तदनेकविहङ्गयानोलिखितं ब
क्तभिर्वक्त्रधारोपादेकस्योल्लिखितो मतः एकस्य बक्त्रभिर्वक्त्रधारोपादनेकविधत्वकपनादुल्लिखि
तालंकारः यथा तत्रैव सुधांशुः स्वपतेर्विपत्तेस्तु कालेविविधं त्यौं सिचिंतामणिर्याचमानैः स्मरेमा
त्रिनीभिः प्रियः कामनीभिर्धनुर्वेदमूर्तिर्धनुर्वेदविद्भिः अत्रैकस्यान्पस्य स्वपत्रादिभिर्वक्त्रभि
श्रीकान्तत्वेन नानाविधतयारोपादुल्लिखितालंकारः ७ अतथ्यमारोपयितुं तथ्यापनिरपह्नुतिः

असत्यमारोपयितुं सत्यस्यापत्तिरपलापोऽपह्नुतिरलंकारः यथा चंद्रे कलंकं कथ-
यंति मूढा वयं वदामोऽमुं तम्मात्रलोभात् तदस्मिन् सुधांतः पथेन गत्वा पिपीलिकाश्चुं-
बंति चंद्रबिंबं अत्र चंद्रे ये कलंकं कथयंति ते मूढा अत्रासुधा इत्युक्त्वा चंद्रे वास्तवं कलंक-
मपलप्य अवास्तवस्य पिपीलिकाचुंबनस्यारोपः कृत इति भवत्यपह्नुतिरलंकारः अ-
त्र पिपीलिकेत्येकवचनोल्लेखाज्जातिसमुदायेऽन्येनैकपिपीलिकाकृतचुंबनासंभावनाकृ-
तो दोषः भ्रांतापह्नुतिरन्यस्य शंकायां भ्रांतिवारणे अन्यस्य भ्रांतस्य शंकायां जातायां
सत्याऽन्यवस्तुकथनाद्भ्रमविषयीभूतस्यापलापेन भ्रमनिवारणे कृते सति भ्रांतापह्नु-
तिरलं॰ यथा कलस्वरं गायति कोकिलालीति नैव विश्राम्यति मासमस मे वर्षासु किं कूज-
ति वा पिकाली नसा पिकाली तु सखी तदाख्या अत्र कोकिलाख्या आली गायति इत्युक्ते कोकि-
लपंक्तिरिति भ्रांत्या पृष्टवत्या कस्याश्चिद्भ्रमविषयीभूतां पिकालीमपलप्य सत्यभूतां कोकि-
लाख्यामालीमुक्त्वा भ्रमनिवारणं कृतमिति भवति भ्रांतापह्नुतिरलंकारः छेकापह्नु-
तिरन्यस्य शंकया तथ्यनिह्नवे यत्रान्यस्य शंकया भ्रांत्या तथ्यस्य निह्नवापलापस्तत्र छेकाप-
ह्नुतिरलंकारः यथा अध्यायातो निष्ठि ह्यारि जल्पन्मधुरमाननं ततः संतुष्टः सखि किं कांतो न
हि हंत सकोकिलः अत्र काचित्सखीं प्रति स्ववृत्तमध्यायात इत्यर्धेन कथयत्

पुनरन्ययोक्ताविवं तथ्यभूतं कांतं नहीत्यनेनापलप्यातथ्यस्य कोकिलस्य कथनाद्भवति छेकापह्नु-
तिरलंकारः ९ पर्यस्तापह्नुतिर्यत्र धर्ममात्रं निषिध्यते यत्र धर्म्येव निषिध्यते न तु धर्मस्तत्र प-
र्यस्तापह्नुतिरलंकारः यथा कृपाराम होराशिपतियशासि प्राज्ञस्त्वमहसा न बद्धेनाविद्योतय-
तिजगतीमद्यमहसा सुधाधामेत्येवं स्फुरितमपि राकानिशिपरं कलंकेनालंकः कलितम
तु मनः कलयति अत्र एतो यशासि जगतीं विद्योतयति सति कलंकेन कलितं मेने सुधाधामेति
नः कलयति न कोपीत्यर्थः इत्यनेन बालव चंद्ररूपधर्मिणं निषिध्य यशसि एव चंद्रस्वरूपकल्प
कल्पनेन भवति पर्यस्तापह्नुतिरलंकारः ११ कैतवापह्नुतिर्यत्र व्याजाद्युक्तिभिर्नं भेवन्न यत्र व्याजमि
षछलादिशब्देन वालवस्यापन्हवलत्रकैतवापह्नुतिरलंकारः यथा मध्याह्नसमानीय नृसारभा
गं वक्षोजमनुत्पाद्यता विधात्रा अजनि भयत्वात् त्रिवलीमिषेण सोपानवर्त्म त्रिनयनहिचक्रे अत्र मि
षेणेति शब्देन त्रिवल्या अपलापः कृत इति भवति कैतवापह्नुतिरलंकारः १२ किंचित्संभाव्यते
यत्र तेत्रोत्प्रेक्षां प्रचक्षते यत्र कस्यचिद्वस्तुनः संभावनामात्रं क्रियते वऽयथा इदं यत् विष्पतीत्यादिना
तत्रोत्प्रेक्षालंकारः संभावनां व्यंजकास्तु नूनं प्रायो ध्रुवं मन्ये शंके जाने इवादिकाः संभावनां
व्यंजयन्ति अत्र तीमोवहत्थेति च यथा प्रायोनीकामरेण भूयसा मन्दिरसोत्यापृथ्वीविषाधीशितुः श्रोहा
सानिलशूर्णितान्वहन्त्मतीयीमे सेदमारोहति किंवा यो रूपं परंपरासमुद्दिनक्रोधानलाद्रुम्पिनो धूमायं

का० करिकर्णतालपवनोद्धृतेव वियज्जहते । अत्र तादृशस्य शेषनागस्य श्वासानिलेन चूर्णिता
वि० पृथ्वी प्रायः आकाशमारोहतीति धूलीधोरणिमालोक्य देवतानां संभावनेति भव
८ त्युत्प्रेक्षालंकारः प्रायः शब्दश्चात्र व्यंजकः ।१२। व्यंजकानान्यभावे तु गुप्तोत्प्रेक्षा प्रव
४. र्त्तते । व्यंजकपदाभावे संभावनायाः सत्त्वाद्गुप्तोत्प्रेक्षा यथा हृदये शोधयत्याधी प्राप्तता
पोत्तापकातराः उत्प्रेक्षम्बुदयं याति निशा दृष्ट्वापि दिवाकरः । अत्र प्रतापोत्तापादेव कातरा
इति संभावनास्ति व्यंजकपदाप्रयोगश्चेति भवति गुप्तोत्प्रेक्षालंकारः ।१४। स्यात्स्मृति
भ्रांतिसंदेहैस्तदेवालंकृतित्रयं वर्णितया स्मृत्या स्मृत्यलंकारः वर्णितया भ्रान्त्या भ्रान्त्य
लंकारः वर्णितेन संदेहेन संदेहालंकारो ज्ञेय इत्यर्थः । तत्र स्मृतिर्यथा नासाग्रन्यस्तदृष्टेः स्ववि
षयविकलीभूतनवाक्षवृत्त्याः किंचित्किंचिद्धृतस्याः पुलकमपि तनोऽभिनिमालं विना याः का
लिंदीकूलकुंजे निरवधि भवतेऽश्लिष्टितं यद्यदासीद् तेतत्तत्स्मरन्त्याः दशमि वदिवसा यान्ति त
स्याः कदाचित् । अत्र विरहिण्याः पूर्वचरितस्मरणवर्णनेन भवति स्मृत्यलंकारः ।१५। भ्रान्त्यलं
कारो यथा मरकतकलितकंकणकंकणच्चलेन वसनांचलेन सा तत्र दीपकलिकाभ्रमतस्तु ८
रुद्धे द्रुतेमणिशिखा विलोपने । अत्र नवोढायाः गृहस्यमणिशिखायामेव दीपकलिकाभ्रमवर्णने
न भवति भ्रान्त्यलंकारः । संदेहालंकारो यथा त्वया नीतो देवः किमिह वदलक्ष्मीपरिवृढः कृपाह

ष्ठुः पातात्किमप्ययष्यावंतत्तितिपने: सभंतानेवेलंनीतवमभूवनमासाद्यकमलायदेषालोलापिह
णमिवद्दिनाविलपयति अत्रविश्लेषारायनमस्ययपावंतनन्छपने: कृपाह्स्वपानस्पवाफलमिदम्
कमलायाः स्त्रणतुल्यतयाद्विनानानयनमिति संदेहवर्णनाद्भवति संदेहालंकारः मीलितं यदि
साहृश्येनाभिभूतनलक्ष्ते यदि स्वसहृशधर्मेणतेरणाभिभूतं वस्तु नलक्ष्यते न ज्ञायते तर्हि मीलि-
तालंकारो भवति यथा कुचयोरत्निगोरद्रूपयोर्द्धनकाश्मीरजयोर्विलेपनं कुरुते सखुवास्त
नः पुनर्नकृतं किंत्वमेयति चिंतयन्त्र अत्र कुचयोरत्निगोरद्रूपेणाभिभूतं कुंकुमं न ज्ञायते अतएव पु-
वोःपुनःपुनर्विलेपनं कुंकुमस्य वर्णनाद्भवति मीलितालंकारः १७ सादृश्याभिभवे स्फूर्तो हेतुनोन्मी-
लितं मतं सादृश्येन सदृशधर्मेणाभिभवे कृते सति वस्तुनः पुनः केनचिद्धेतुना स्फूर्तो ज्ञातायां-
तस्यामुन्मीलितालंकारः यथा नृत्रेव हतः सैराजेषु सितेषु संस्थितो नलक्ष्यते हंसगणः संपतनः कु-
दाचिद्दयाति विभेदमप्यसोपतद्विरेफप्रचलत्पत्रकेः अत्र सितपक्षवर्णित्वेनतद्रूपसादृश्येन हंस
गणस्याभिभवे भेदाज्ञाने सति भ्रमरपातवशात्प्रचलत्पत्ररूपहेतुना सरोजेभ्यो हंसगणस्य भेदस्फूर्तिर्जा-
यते इति भवत्युन्मीलितालंकारः १८ अनुमानं च कार्यादेः कारणाद्यवधारणं कार्यादिरूपेण हेतुना
यत्र कारणादीनामवधारणं ज्ञानं भवति तत्रानुमानालंकारः यथा सहसा हृदये निधाय चैतो नयनादी-
द्रियतु दृशं विधाय अयि कंटकिनांगयष्टिसत्कंपयं ध्यायसि किं रहो निषण्णा अत्र नयनमुद्रणादेर्हे-

का॰ यध्यानकार्येण हेतुना किंचिद्विषयिकध्यानं ज्ञानमिति विशेषं पृष्टः इति किं ध्यायसी
वि॰ त्यनेन इत्यत्रानुमानालंकारः १९ अर्थापत्तिः स्वयंसिद्धेत्पदार्थान्तरवर्णनात् एकप
९ दार्थवर्णनाद्यद्यन्यपदार्थः स्वयंसिद्धेत्तदार्थापत्त्यलंकारः यथा नैत्रैव एतस्मिन्नुत्सुला
१ मुधे रणभुवो मूर्छनमारोहति आद्यत्राखरमंडलोदितमणिः खद्योतपोतायते भोः कः पु
ष्टगकातरैस्तृणगणैरोरस्यास्तमालोकयन्धावन्मूर्छति संगराजनवपतिः कोयं पतंगाकृतिः अ
त्रेष्टादीनामेवंविधपरिभवरूपैकपदार्थवर्णनादेवशत्रुः परिभवरूपोन्यः स्वयमेव सिध्यती
ति भवत्यर्थापत्त्यलंकारः २० अलंकारः परिकरः साभिप्राये विशेषणे विशेषणे साभिप्राये स
ति परिकरालंकारः यथा देवानर्चयसंचयप्रतिदिनं उत्पत्तिजन्मांतरे भोगाय प्रयतेनामलोके
नु विधेः स्वर्गाय हिं सांकुरः इत्येवं वंचकवंचनोत्यपगता बुद्धिस्त्वदीया चिरात् अप्रत्यक्षपदार्थसार्थ
रहितं पंथानमारोहतु अत्र चार्वाकस्योक्तौ पंथानमित्यस्य अप्रत्यक्षसार्थरहितमिति विशेष
णं साभिप्रायं यथा हि वंचकानां यात्रिकादीनां पंथा अप्रत्यक्षस्वर्गादिरूपपदार्थयुक्त इत्यनेनहेयः ९
अप्रत्यक्षस्याप्रमाणत्वात् अस्माकं तु नर्फाहितः पंथा उपादेय एव न वेति भावः अकाधकं विशेषणमि
ति ध्वनितपरिकरालंकारः २१ साभिप्राये विशेष्ये तु भवेत्परिकरांकुरः विशेष्ये साभिप्राये सति
परिकरांकुरालंकारः यथा अथिकन्धिश्रुतिविनशान्तिः प्रियरजरयापि च जर्जरीकृताङ्गः अपि शित
परि

मधिकस्तथाभिभूतः किन्तु त्वगुणेभ्य गणनायक त्वगुणानि अत्र भ्यगणनायक इति विशेष्यपदं सा
भिप्रायं तथाहि अपरेभ्यगणाः त्वगमयन्ति पुनमेव अयं तु भ्यगणानां नायकः कथं त्वगमयन्ति यात
विनाशरितमत्तमतंगपिष्टितानीति भावप्रकाशकमिदं विशेष्यपदमिति भवति परिकरांकुरालंकारः २२
स्यात्काव्यलिंगं वाक्यार्थेनूतनार्थसमर्थके वाक्यार्थेनूतनार्थसमर्थके कदाप्यज्ञातार्थप्रकाशके सति काव्य
लिंगालंकारः यथा भस्मीभूतः कुसुमविशिखः शंभुनेत्राग्निना भूद्बालादाही तदनुमनसि श्रापमज
न्मा व भूव भूयस्तस्मिन्विरहदहनैर्दाहितो सोमयेवं कुत्रोन्यत्राप्यपयति पुनर्मीमहानत्वेवधि अत्र विरहद
हनेन मदनदाहएव नूतनः कदाप्यभूतत्वात् ताहशार्थप्रकाशकोत्र वाक्यार्थः इति भवति काव्यलिंगालंकारः २३
वांछितार्थाधिकप्राप्तिरयत्नेन प्रहर्षणं यत्र विनैव यत्नं वांछितार्थाधिकप्राप्तिर्वर्ण्यते तत्र प्रहर्षणालंकारः
यथा अद्यालि सा रोषवती सखी मे निवेदिते द्वादि सखीभिरित्थं यावद्युवा वांछति दृष्टिमात्रमालिंगितस्
तावत्स्वयं युवत्याः अत्र दृष्टिमात्रं वांछकस्य नायकस्यायत्नेनैवालिंगनप्राप्तिर्वर्ण्यते न भवति प्रहर्षणालंकारः २४
इष्यमाणविरुद्धार्थसंप्राप्तिस्तु विषादनं इष्यमाणवस्तुनो विरुद्धवस्तुप्राप्तिर्यत्र वर्ण्यते तत्र विषादना
लंकारः यथा गत्वापि वाप्यतिमधूनि तमेवधष्टभिरित्थं विचिंन्यस सरसी मल्लि रेतियावत् केनापि ताव
दतिमत्तमतंगजेन निर्मूलितानि सहसैव सरोरुहाणि अत्रेष्यमाणस्य सरसीषु मधुपानस्य विरुद्धवस्तु
मधुस्थानभूतानां सरोरुहाणामुन्मूलनं तस्य प्राप्तिर्वर्णने सति भवति विषादनालंकारः २५ सामान्यय

का· ष्टिसादृश्याद्भेद एव न लक्ष्यते सादृश्यात्समानधर्मवशाद्यदि परस्परं वस्तूनां भेद एव न ज्ञायते तर्हि
वि· सामान्यालंकारः यथा उद्यत्पलाशकुसुमैरमितैः समन्ताच्छोणीकृतासु सकलासु दिशासु स
१० द्यः नावोधि कामुकजनैरभिसारिणीभिः शोणायितापि तनुरत्र न दृश्यमानि निशान्ते अत्र सादृश्यात्
10 किंशुककृतसकलदिक्शोणत्वरूपधर्मवशाच्छिशानकालीनारुणोदयकृतारक्तप्राचीदिशा
याभितरदिग्व्यापकत्वयाभेदो न लक्ष्यते इति भवति सामान्यालंकारः मीलिते तु सदृशधर्मिणाभिभू
तस्य स्थानमेव न ज्ञायते इह तु सदृशधर्मवशात्परस्परभेदमात्रं न ज्ञायते पदार्थस्तु ज्ञायत एवेति
मीलितात्सामान्यविशेषः २६ अथातिशयोक्तिश्चतुर्विधा अक्रमातिशयोक्त्यत्यन्तातिशयोक्तिभेदको
तिशयोक्तिरूपकातिशयोक्तय इति नामानि क्रमेण लक्षणोदाहरणानि अक्रमातिशयोक्तिश्च युगप
त्कार्यकारणे युगपदेकदैवद्यदि कार्यकारणयोरुत्पत्तिर्वर्ण्यते तर्हि अक्रमातिशयोक्त्यलंकारः यथा
त्वदरातिमहीपालभवने भुवनेश्वर नवक्रोधेन दावाग्निः सहैव समुपस्थितं अत्र दावाग्निरूपकार्यस्य
कारणरूपक्रोधः युक्तस्तु कारणस्य पूर्वभावः परभावः कार्यस्य इह तु तयोरेककालमेवोत्पत्तिर्वर्णिता १०
अवक्रमातिशयोक्त्यलंकारः अत्यन्तातिशयोक्तिस्तु पौर्वापर्यव्यतिक्रमे कार्यकारणयोः पौर्वाप
र्यव्यतिक्रमे सति कार्योत्पत्त्यनन्तरं कारणोत्पत्तिर्वर्णिता यत्र सात्यन्तातिशयोक्त्यलंकारः यथा अ
मनुमानमयी मतिरादिनागतवनीवनन्ततद्वीक्षणानन्तरं अत्र तु नयनकृतवानपपादयोः सरिपतन्यतिरे

षष्ठःस्तनः अत्र कार्यस्य मानभंगस्य प्रसिद्धकारणाद्दत्तनयात् एवमेवोन्यत्रिवर्णितेति भवन्त्यं
नातिशयोक्त्यलंकारः २८ भेदकातिशयोक्तिः स्यात्स्वभेदस्येत्स्वजातिषु यदि स्वजातिष्वेव स्वभेदो
वर्ण्यते तदा भेदकातिशयोक्त्यलंकारः यथा तेत्रैव धन्येयमन्यैव नितंविनी नालीलान्सवानां प्रसवायरी
तिः असारसंसारविचारणेपि यया किल व्याकुलतां भजंति अत्र सकलरीतीनां मध्ये नितंविनीनां री
तिरेषैवेत्युक्त्या स्वजातिमध्य एव स्वभेदः कृत इति भवति भेदकातिशयोक्त्यलंकारः रूपकातिशयोक्तिः
स्याद्रूपकाद्रूपनिर्णये सादृश्यवशाद्यस्याभेदेनारोप्यते तद्रूपकं यस्मिन्नन्यस्याभेद आरोप्यते तद्रू
प्यं तथा च यत्र रूपस्योल्लेखो नास्ति केवलं रूपककल्पनोरेव रूप्यमुच्यते तत्र रूपकातिशयोक्त्यलंकारः
यथा इयं भुजंगिनी स्मितालसदनेकरुच्या विना द्विरेफान्निसेविताप्रसवं वंजनाकृता फलद्वयभरा
नताविलसितानवैः पल्लवैर्विलोचनपथं गता भवति कापि हेमीलता लतास्वरूपस्य रूपकस्यैवोल्ले
खेन कामिनी स्वरूपमुच्यते ननु कामिन्याः रूपमुल्लेखोप्यस्ति एवं भुजंगिन्युल्लेखेन वेणी उल्ला
लेखेन वदनपंक्तिः द्विरेफान्मुल्लेखेन रोमावली खंजनोल्लेखेन नयने फलद्वयोल्लेखेन कुचौ पल्लवोल्ले
खेन करचरणाधराः इति भवति रूपकातिशयोक्त्यलंकारः ३० प्रौढोक्तिरसदृशाज्ञस्यान्तदुक्तत्वाव
कल्पनं तत्कर्मण्येव एकस्याप्यसमर्थस्यापि तत्कर्मणि शक्तत्वावकल्पनं समर्थत्वावकल्पनं यत्र क्रियते
तत्र प्रौढोक्त्यलंकारः यथा दिशो दंडाद्ध्रुवं युगपदधिरूढस्य प्रचलितासमेत्यब्रह्मांडप्रसरितनवनीतसिंह

का° नृपतेः खलतारा ष्णास्फुरदद्भुतधामे कफलिनी जगन्मूर्त्यैकीर्त्तिः कलयति लतामूर्त्तिम
वि° भितः अत्र मूर्त्तिग्रहणाय मर्यायाः अपि कीर्त्तेर्लतामूर्त्तिग्रहणावर्णनेन भवति प्रोहोक्तालंकारः २१
११ वर्ण्यानां तुल्यधर्मत्वे कथितास्तुल्ययोगिता वर्ण्यानामवर्ण्यानां तुल्यधर्मत्वे सति समानधर्मत्वे सति तु
॥ ल्ययोगितालंकारः यथा अस्तं याते दिवानाथे निष्प्रभो नायमे हारयं उन्मीलंति कुमुद्वत्यस्य को
रीनयनानिव अत्र वर्ण्यानां कुमुद्वतीनां चकोरीनयनानां चोन्मीलनरूपसमानधर्मत्व वर्णनात्स्व
त्तितुल्ययोगितालंकारः २२ संभावनं यदीमस्यात् इत्यूहे सति जायेत यदि इमस्य स्यात्तर्हि इदं स्यादिति
तुहसति वितर्के सति संभावनालंकारो जायते यथा अंगीकृततपोर्वकीर्त्तिर्विनितदीवासितास्मुअर्कके
लासीकृतदिक्करीन्द्रशिरसि नृपस्तव पादांबुज विश्वव्याप्य विनाशिंकरपटं पायात्वदीय यशो न सा च
घ संवननसिंहनृपतेस्त्वहानपानीयजं अत्र यदि त्वहानपानीयजं यशो न स्यात्तर्हि शंकरपटं यायाः वितर्कः कृ
त इति भवति संभावनालंकारः २३ अवर्ण्यानां च वर्ण्यानां धर्मैक्ये सति दीपकं अवर्ण्यानां प्रकृतवर्णनेन स्तुत्य
त्वेन अन्तर्हदयानां वर्ण्यानां प्रकृतवर्णनेन स्तुत्यत्वेन तद्ददयानां परस्परानां धर्मैक्ये सति दीपकालंकारः यथा इ
न्दुः कांत्या यतिः रम्यानीत्या च वसुधाधिपः रीत्या काव्यवधूर्भट्टन्याकुलेनेजनरंजनं अत्र चन्द्रादीनाम वर्ण्यानां
वर्ण्यस्य च राज्ञ [illegible] जनरंजनरूपधर्मैक्येन भवति दीपकालंकारः २४ आवृत्ते दीपकपदे भवेदावृत्तिदीपकं दीप ११
कपदे वर्ण्यावर्ण्ययोर्धर्मैक्यबोधकपदे आवृत्ते सति आवृत्तिदीपकालंकारो भवति आवृत्तिस्त्रेधा अर्थः ३ नः
वृत्तन यथा उद्धांत्यभिमन्तियामिन्याः कामिन्या भाति कामुकः लतया भूरुहो भाति भूरुहो भाति विद्यया अत्र

वर्ण्यस्य प्रस्तुतस्य प्राकरणस्य अत्रावर्ण्यस्य चंद्रादेर्धर्मैकवोधकस्य भातीति पदस्यावृत्तिरस्तीति भवति
आवृत्तिदीपकालंकारः ॥ ९६ ॥ पृथगुद्दिष्टसामान्ये प्रतिवस्तूपमा मता सामान्ये समानधर्मे पृथगुद्दिष्टे सति
भिन्नपदेन कथितेसति प्रतिवस्तुनि प्रतिपदार्थं उपमासत्वे च प्रतिवस्तूपमालंकारः यथा विलीनतामेव गता
तारा दरिद्रता महीयसीनां प्रभवत्यर्कोदये अदृश्यतामेव भजन्ति वासवाः समंततो भानुमतः करोदये अत्र
दरिद्रताया उल्लूकानां चौदृश्यत्वप्राप्तिरूपसमानधर्मत्वे दरिद्रता विलीनता गता वासवा अदृश्यता भजं
तीति पृथक्पदेनोक्तमस्ति च प्रतिपदार्थमेवोपमानं यथाहि राज्ञो भानुमतो दरिद्रता वा वासवैः करस्य किरणैः
रिति भवति प्रतिवस्तूपमालंकारः ॥ ९७ ॥ चेद्विंवप्रतिविंवत्वं दृष्टान्तस्तदलंकृतिः यदि विंवप्रतिविंव
त्वं भवति तदा दृष्टान्तस्तदलंकृतिः दृष्टान्तालंकारः अयं भावः यथा विंवप्रतिविंवयोर्जलवस्तु दे
दर्पणगतवस्तुनोः परस्परमेकैवछाया दृश्यते तथा यत्र पदार्थयोः परस्परमेकैवछाया भासते तत्र
त्रायमलंकारः यथा अनर्गलपरिस्फुरन्मधुरदिव्यकाव्यं वदन्मुखांबुजनतपदद्वयस्फुरितधीरपि
स्पर्द्धते द्विनैः कतिपयैरितः कथयितेव दिल्लीपतेः पदं नवम्मितिस्फुटमनसि भिल्लपत्नीपतिः
अत्र तादृशकाव्यं वदन्नपि मुखांबुजनतपदद्वयस्फुरितधीकुकविरपि स्पर्द्धते इत्येकपदार्थः इति कति
पये दिनैः दिल्लीपतेरपि पदं नवम्मिति मनसि भिल्लपत्नीपतिः कथयितेवेत्यपरः पदार्थः अनयो
स्तु विंवप्रतिविंवभावः स्फुट एव तथाहि तादृशकाव्यपदकविस्पर्द्धापदद्वयकथनं कुकवेरुपहासा
येव तथा दिल्लीपतेपदं नवम्मिति भिल्लपत्नीपतेरपि कथनमुपहासायैवेति एवं यथैतत्कथने

का॰ वि॰ १२ 12

तथा कुमुदकविस्पर्द्धा इति परस्परं बिंबप्रतिबिंबवद्वैकेवच्छायाभासते इति भवति दृष्टांतालंकारोऽथ नन्वत्रा
उभौ प्रतिवस्तूपमालंकारः किं न स्यादिति चेन्न पत्नीपतो कथनेन हेयाधर्मः कुकवोस्पर्द्धाकरणात्
पोधर्मः इति धर्मभेदान्न प्रतिवस्तूपमा तद्धर्मैक्य इति ॥ वाक्यार्थयोः सदृशयोरैक्यारोपेण नि
दर्शना सदृशयोर्वा वाक्यार्थयोर्यत्र व्योमकृत्यारोपे कृते सति निदर्शनालंकारः यथा योऽभितो वस
तो नाप्यभवत्तः समुपागमः मृत्युमभवत्तेसायम्भिंदोरस्य तन्निर्भरः अत्र सखत्वदृष्टत्वेन च सदृश
योर्नायकागमेंदुसंबंधयोस्तन्निर्भरयोर्वा वाक्यार्थयोर्यत्र सादृश्येनारोपः कृत इति भवति निदर्श
नालंकारः असंभावितत्वेन स्फुटमेव तथाहि अभितो वसतः कांतानुरागिणो नायकस्य समया
भावादेवागमाभावः एवं देवतामात्रभोग्यत्वेनास्य तस्य निर्भराभावोपीति भावः व्यतिरेको विशेष
श्चेदुपमानोपमेययोः उपमानोपमेययोः कश्चिद्विशेषश्चेत्कीर्त्यते तर्हि व्यतिरेकालंकारो भव
ति यथा हृदयेववसुधा सत्यमानंदयंति मानसं महांतमपि किं तेषां समो हरयंति संततं अत्रोपमा
नभूतवसुधानंदमेयभूतवसुधायाः समोहकत्वेनैव विशेषः इति भवति व्यतिरेकालंकारः २९
सहोक्तिः सहभावश्चेद्भासते जनरंजकः यदि जनरंजकः सहभावो भासते तत्सहवर्जिताभासते
तर्हि सहोक्त्यलंकारः यथा अतिचित्रमिदं स्तवमेत्रतिपादितमेवमहोजगतीपतिनाविदुरव १२
त्वियन्त्रियतं सहितोभवदीयप्रतापरिवा पतिनायदवंतनवमुत्तिनायकनावकदाचनपयोनि
धितः सहसाजनिमेत्य यथोहिमदीधितिरेष जगद्धवलीकुरुते न सहसात्र तदितिनाव दिवाप

